हीयेत तस्मात् प्रधानाविरोधेनाङ्गानि यथाशक्त्युप-संहर्त्तव्यानि। नन्वेवं हीनाङ्गादपि प्रधानात् फल-सिद्धेरभ्युपगमात् समर्थोऽप्यङ्गानि परित्यक्ष्यतीति नैवम्। शक्तस्य कामतोऽङ्गे त्यज्यमाने वैगुण्यं स्यादेव अङ्गोपदेशं निमित्तं वालोचयोभयानुरोधेन यावन्त्यङ्गानि कर्त्तुं शक्नोति तावद्भिरुपेतं प्रधानमेनः क्षपयतीति शास्त्रार्थोऽवधार्य्यते तावतैव शास्त्रवशात् फलनिष्पत्तिः इति साधूक्तम् “विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदादिति”। एतच्च प्रयोगविध्यनुजीव्येष्वङ्गेषूच्यते यद्धि कुर्य्यादित्युच्यते तत् यथाशक्त्युपबोध्यते। यानि तु स्वभावसिद्धानि विध्यन्तरसिद्धानि वोपजीव्यन्ते यथा लोके धनार्जनादि वेदेऽपि कालो विद्याग्नयश्च तेषां स्वरूपेणैवाधिकारिविशेषणत्वम्। द्रव्यवान् विद्यावानग्निमानिति। एतदुक्तं भवति अङ्गं हि विधिबलादुपादीयते निमित्तानुरोधाद्वा त्यज्यते उभयानुग्रहार्थं वा शक्त्यत्युपादीयते अशक्तं प्रति त्यज्यत इति नान्या गतिरस्ति तत्रोभयानुग्रहो युक्तो यदि सम्भवति सम्भवत्युपादेयेष्वङ्गेषु यथाशक्ति व्रीहीन् सम्पादयेत् यथाशक्त्यवहन्यादिति आहवनीयादिस्वरूपं तु नानेन विधिनोपादीयते तस्मादग्निमान् विद्यावान् द्रव्यवान् जीवंश्च यजेतेत्येवमाम्नायते अतो विद्याग्निकालाद्यपरित्यागेनान्येषामङ्गानां यथाशक्त्यनुष्ठानं सिद्धम्। तथाचोक्तं तन्त्ररत्ने “यानि प्रयोगविधिना कर्त्तुरुपादेयत्वेनाङ्गानि चोद्यन्ते तेषामेव शक्तिपरिमितत्वम् यावन्ति शक्नुयात्तावन्ति कुर्य्यादिति यानि तु विध्यन्तरप्रयुक्तानि स्वयं सिद्धानि वाङ्गत्वेन दृश्यन्ते तानि स्वरूपत एवाधिकारिविशेषणम् यथाग्न्यादीनि तेषामुपादानस्य प्रयोगविधिनानुपादानाच्च यावच्छक्त्युपबन्धः सम्भवति किन्तु तदपेक्षो विधिस्तद्वन्तमेवाधिकरोति तेन सपत्नीकस्यार्षेयस्य (वेदस्य) व्याख्यानोपात्तसंस्कारविशिष्टस्याग्निमतो विद्यावतः प्रदोषादिकालसंयोगिनोऽधिकारो नान्यस्येति। एवं चाप्रतिसमाधेयाङ्गवैकल्येऽप्यग्न्यादिमानधिक्रियेतैव आधानं तु न कुर्य्यात्तस्यानैमित्तिकत्वादिति”। “प्रायश्चित्तविधानाच्च” सू०। ‘प्रायश्चित्तविधानादप्येवं कल्प्यते यद्विगुणेऽपि फलनिर्वृत्तिर्भवतीति। यदि च विगुणात् फलं न स्यात्तर्हि प्रायश्चित्तं न विदधीत नहि निष्फलस्याङ्गैः कृत्यमस्ति अस्ति च विधानम् तस्माद्विगुणादपि फलं भवतीति। येषां मते नित्येषु फलाभावेनापूर्वाभावात्तदर्थैतिकर्त्तव्यताभावेन निमित्तभेदने जाते वैगुण्यात्तत्परिहारायापरं होमाख्यमङ्गं भिन्ने जुहोतीत्यादिकमनुपपन्नं न क्रियत एव। पक्षान्तरे असत्यामितिकर्त्तव्यतायां भेदने जातेऽपि नास्ति वैगुण्यम् गुणहानिर्हि वैगुण्यम् असति गुणे कस्य हानिः स्यात् ततश्चास्मत्पक्ष एव प्रायश्चित्तविधानमुपपन्नमिति”। “तथा च दृष्टम्” सू०। “नित्यं कर्म यथा कथञ्चित् श्रुताङ्गपरित्यागेनापि यथाशक्त्यङ्गोपेतमनुष्ठातव्यत्वेन स्मृतौ दृष्टम्। तथा हि “यत्पयो न स्यात् केन जुहुया इति व्रीहियवाभ्यामित्यादि न वा इह तर्हि किं च नासीदथैतदहुत सत्यं श्रद्धायाम्” इत्यन्तेन ग्रन्थेन। तथा “तदेव यादृक्कीदृक् च होतव्यमिति” शाखान्तराच्च तस्माद्विगुणेऽपि नित्ये प्रत्यवायपरिहाररूपं फलं भवति अतएवोक्तं कर्काचार्य्यैः “उपात्तदुरितक्षयो वा उत्पत्स्यमानदुरितप्रतिबन्धो वा भवत्येवेति”। “नित्यकर्मण्यारब्धे अनारब्धे वा प्रतिनिधिर्भवति अवश्यकर्त्तव्यतया यथाशक्तिप्रयोगस्य व्यवस्थापितत्वात् इति” चन्यत्र तत्रोक्तम्। “काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः” इत्युक्तेस्तत्र प्रतिनिधिरस्ति। “नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते” ब्रह्मपु०

**नित्यक्षौर** न० अवैधकेशादिच्छेदने “चूडोदिते तिथावह्नि बुधेन्दोर्दिवसे नरः। नित्यक्षौरं प्रकुर्वीत जन्ममासे न तु क्वचित्” ज्योतिषसारः। अधिकं क्षुरकर्मन् शब्दे २२८६ पृ० दृश्यम्

**नित्यगति** पु० नित्यं गतिरस्य। सदागतौ वायौ हेमच०। “यथा वायुर्नित्यगतिर्जलदान् शतशोऽम्बरे” भा०स०४६अ० नित्यगमनादयोऽप्यत्र।

**नित्यदा** अव्य० नित्य+दाच् स्वरादि। सर्वदेत्यर्थे “त्वमग्निः सर्वभूतानामन्तश्चरसि नित्यदा” भा०आ० ६अ०।

**नित्यदान** न० नित्यं प्रत्यहं कर्त्तव्यं दानम्। प्रत्यहकर्त्तव्ये दाने “नित्यं नैमित्तिकं काम्यं त्रिविधं दानमिष्यते। अहन्यहनि यत् विप्र! दीयतेऽनुपकारिणे। अनुद्दिश्य फलं तत् स्यात् ब्राह्मणस्य तु नित्यकम्” गरुडपु०।

**नित्यनैमित्तिक** न० कर्म०। नित्यत्वनैमित्तिकत्वयुक्ते कर्मभेदे पर्वश्राद्धादौ “नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पण्डितैः” श्राद्धत० मार्कण्डेयपु०। प्रायश्चित्तेऽपि तथात्वम्। अवश्यकर्त्तव्यत्वेन नित्यत्वं पापनिश्चयवता कर्त्तव्यत्वेन नैमित्तिकत्वं यथाह प्रा०त० रघुनन्दनः “प्रायश्चित्तस्य नित्यत्वेनाङ्गवैकल्येऽपि फलसिद्धिः। तथा